Digitized by Sarayu Trust Foundation Delhi and eGangotri

अन्नपूर्णायै नमः ॥

# सूर्य्यब्जाहस्करः ।

तर्कर्कशठदाटवीपञ्चाननपञ्चाननार्हकैः ।
श्रीमत्सदाशिवैराशुसङ्गृहीतोनूमोदकः॥१॥

श्रीमत्क्ष्मामरसत्क्रियोजनवर--श्रीमन्सुशर्म्मा
ततः श्रीवत्सा हरपादपङ्कजवरालिस्तत्सुतौ
श्रीयुतौ० । बाबूदत्तसदा सदाशिवपद-
ध्यानैकशक्तोमहान्ने वालाल इती ततो-
गणकशास्त्री रामकृष्णः सुधीः॥१॥
तेन वाराणसीयज्ञेश्वरयन्त्रे हि-
ताय नुः । मुद्रापय्य द्विने-
त्राष्टेन्दुमिते सम्मका-
शितः ॥२॥ शमिति

॥ अस्य पुनर्म्मुद्रणादि संग्रहीत्रधीनम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

# विज्ञापनम् ।

मैथिलब्राह्मणादिचतुर्व्वर्णजननप्ररणाशौचानभिज्ञसर-लोपायज्ञटितिप्रतिपत्तये विद्याब्धिपं० व० जि० भागलपुर पो० आ० सुखपुर-परसरमा-वास्तव्यझोपनाममैथिलश्री-सदाशिवशर्म्मसङ्कलितोयङ्ग्रन्थः प्रकाशितः 'अत्रयदशुद्धं' धीधनैः कृपया विशोध्य पाठ्यम् इत्यभ्यर्थये—

पु० मि० स्थानम्" ज्यौ० श्रीरामकृष्ण सदा० मो० तेलहर० पो० वरिआही० जि० भागलपुर० ॥

—०—

# सूर्य्यब्जाहस्कर सूचीपत्रम्० ।


| | पृ० पं० | | पृ० पं० |
|---|---|---|---|
| अथ मङ्गलम्० | ... १- ३ | अथैकादशाहः | ... १७-१२ |
| अथ पिण्डवि० | ... १- ८ | अथ सपिण्डीकरणम् | १८- १ |
| अथचतुर्व्वर्णाशौचम्० | १०-११ | अथमलमासेवार्षिकवि० | १८-२० |
| अथसपिण्डादिलक्षणम् | १०-१७ | अथचतुर्थीप्राक्कन्याम० | ११-१६ |
| अथ जन्माशौचम् | ... १०-२० | अथपित्रादिमृतवर्षेवि० | २०- ८ |
| अथाशौचशङ्करः | ... ११- २ | अथ सापिण्ड्यनि० वि० | २१-११ |
| अथ विदेशस्थाशौचम् | ११-१३ | अथ श्राद्धपूर्व्वदिनेक्षौरं | २१-२२ |
| अथ बालाद्यशौचम् | ... ११-२० | अथ हविष्यनि० | ... २२-१० |
| अथ स्त्र्यशौचम् | ... १२-११ | अथ रविव्रतनि० | ... २३- २ |
| अथ गर्भस्रावाशौचम् | १३- १ | अथैकादशी | ... ... २३-१४ |
| अथ भिन्नगोत्राशौचम् | १३-११ | अथ श्राद्धका० | ... २४- ४ |
| अथ क्रिया | ... ... १४- ५ | अथैकोद्दिष्ट० | ... २४-२० |
| अथाधिकारिणः | ... १४- ८ | अथैकाद० पारणा० | ... २५- ४ |
| अथ पर्णनरदाहः | ... १५- १ | अथ नवान्नम्० | ... २५-१३ |
| अथैकादशाहेऽशौचे० | १६- १० | | |


CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री ढुण्ढिराजाय नमः ।

# सूर्य्यब्जाहस्करः ।

कालो मालीकृतदनुजमुण्डाट्टहासा सदाशावासा आसादयतु चपलव्वाक्कदम्वम्मदीयम् ० । यस्मादिद्वज्जनगणमनोह्लादकः स्यादकस्मादित्याशास्ते क्षितिसुरजनिः संग्रहोयम्मदीयः ॥ १ ॥ सू(१)र्य्यब्जाहस्करोविद्वन्मनोरञ्जनकारकः । सदाशिव इती मैथिलः श्यामापादभक्तकः ॥ २ ॥

## अथ पिण्डविचारः ॥

यत्र दाहकेन सगोत्रेण असगोत्रेण वा पूरकपिंडदानं कृतं तत्र पुत्रादिप्रधानश्राद्धाधिकारी दश पिंडान् दातुमर्हति नवेति विप्रतिपत्तौ० स तान्दातुमर्हति० वक्ष्यमाणेभ्यो नानामुनिवाक्येभ्यो नानालिखनेभ्यश्च ० । तथाहि यमः । नरे प्रेतत्वमापन्ने दद्यात्पिंडम्मुखाग्निदः ० । देयोधिकारिणा तद्ददत्वा पितृहा भवेत् ० । इति प्रमाणपल्लवे नरसिंहठक्कुराः । विष्णुः, यश्श्राद्धकारी स पिंडदायी स्मृतः । यो यस्य स्वमाददीत स तस्य श्राद्धं कुर्य्यात्पिंडं दद्यात् ० । यश्चाग्निदस्सोपि दशाहं समापयेत् ० । इति श्राद्धप्रदीपे

(१) सूर्य्यब्जाहस्करः विद्वन्मनोरञ्जनकारक इति पददयं संग्रहविशेषणम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



कुसुमांजलिवर्द्धमानोपाध्यायाः ॥ देवलः । समाप्य दशमं पिंडन्तत एकादशं चरेत् ० । इति श्राद्धचिन्तामणौ वाचपतिमिश्राः ॥ वृद्धविष्णुः । अदत्वा पूरकान् पिंडान् न कुर्य्यात्षोडशीं क्रियाम् । इति स्मृतिसारसमुच्चये विश्वेश्वरोपाध्यायाः ॥ स्मृतिसारे शातातपः । अकृतेपि कृतेवापि कनिष्ठादिभिरौरसैः । यत्र कुत्रापि ज्येष्ठस्याधिकारः प्रेतकर्म्मणि इति० । गरुड़पुराणे ० ॥ कृतस्य करणन्नास्ति प्रेतकार्य्यादृते खग ० । यत्करोति नरः कश्चित् कृतम्पूर्व्वञ्च नश्यति ० । इति पारस्करीयहरिहराभाष्ये ॥ ततः प्रभृतिज्ञातीनां नियमा उच्यन्त इत्याद्युपक्रम्य,, तेषां मध्ये प्रेताधिकारी पुत्रादिः । दशरात्रय्यँवत् प्रत्यहमेकैकमवयवपूरकं प्रेताय दद्यात् ० । इति द्वैतपरिशिष्टे । दैवादन्येन दाहे कृते,, पश्चादधिकारिणि चागतेपि दाहकर्त्ता दशपिंडादेया एव ० । असगोत्रस्सगोत्रो वा यदि स्त्री यदि वा पुमान् । प्रथमेहनि यो दद्यात्स दशाहं समापयेत् इत्यादिना तस्य विहितत्वात् ० । तत्राधिकारिणापि दशपिंडा देया एव ० । अकृत्वा प्रेतकार्य्याणि प्रेतस्य धनहारकः । वर्णानां यद्धये प्रोक्तं तद्व्रतन्नियतञ्चरेदिति स्मृतेः । पितुः पुत्रेण कर्त्तव्या पिंडदानोदकक्रिया इत्यादिस्मृतेरसंकुचितश्रवणात् च ० ॥ नच शरीरद्वयोत्पत्तिः,, द्वितीयस्यापि प्रथमारब्धशरीरपूरकत्वात् भवतु वा द्वयम् "किन्तावता" द्वितीयस्यापि षोडशश्राद्धक्रियया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



नाऽयत्वात् इति केशवमिश्राः ॥ पुत्राद्यधिकारिणि दूरस्थे विदेशस्थे वा अन्येन पिंडदाने कृते पुनः पुत्राद्यधिकारिणा दशपिंडादेयाः । तथा च,, ॥ दद्यात्पिंडान्तरं कर्त्ता पुत्रादावधिकारिणि, विदेशस्थे दाहकर्त्ता पिंडदानं परेण च ० । इति श्राद्धरत्ने लक्ष्मीधरोपाध्यायाः" ॥ पुत्राद्यधिकारिणि विदेशस्थे अन्येन दाहकर्त्ता पिंडदाने कृते पुत्रादिरपि पिंडं दद्यात् ० । "इति श्राद्धाविवेके रुद्रधरोपाध्यायाः" ॥ " तथा च" उक्तनानावचनस्वरसात्पूरकपिंडदानाद्यश्राद्धयोरङ्गाङ्गिभाववोधः॥ फलवत्त्वेनोपस्थितस्य सन्निधौ श्रूयमाणं यदफलवत्त्वेनोपस्थितं तदंगमिति सकलमिमांसकसिद्धान्तात्, अस्ति च प्रकृते,, सिद्धान्तविषयता० "तथा हि०" प्रयोजकतासंबंधेन प्रेतत्वविमुक्तिरूपफलविशिष्टस्याद्यश्राद्धस्य सन्निधौ श्रूयमाणमुक्तसंबंधेनोक्तफलविशिष्टान्यं पूरकपिंडदानं । न च,, कृतस्य पूरणन्नास्तीति न्यायविरोध इति वाच्यं ० । स्वकृर्त्तृके स्वकर्तृकाभाव इति न्यायार्थः । "कथमन्यथा" कनिष्ठेन कृते षोडशश्राद्धं विदेशादागतस्य ज्येष्ठस्य श्राद्धकरणमंतरापातित्यपरिहारः । सहसक्रुषयो गामेकामिति न्याया च्च,, न कृतकरणत्वदोष इति भावः ॥ अत एव,, सद्यश्शौचे तद्दिन एव पूरकपिंडदानशय्याद्यश्राद्धानि भवंतीति द्वैतनिर्णये श्री वाचस्पतिमिश्राः" ॥ अत एव,, आदिपुराणे ० सद्यश्शौचे दशपिंडदानमाह ०। दिवसे दिवसे देयः पिंड

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



एवं क्रमेण तु० । सद्यश्शौचेपि दातव्यास्सर्वेपि युगपत्तथा ॥ इति ० । "एवम्प्रेतक्रियाधिकारे" अपुत्रस्य तु या पुत्री सैव पिंडप्रदा भवेत् ० । तस्य पिंडांदशैवैतानेकाहेनैव निर्व्वपे दिति० ऋष्यश्रृंगमुनिरप्याह ॥ नह्यावृत्तिमंतरा सद्यश्शौचिनोहोरात्राशौचिनश्च दशाहिकपिंडदातृत्वं सम्भवति० दाहकर्तुस्त्रिरात्राशौचविधानात् । अत "एव" दशरथमरणे ० भरतकृतपिंडदानाद्यनंतरम्वनवासे रामोपि पिंडदानमकृत० । यदाहाध्यात्मरामायणं ० । विशिष्टश्रान्तवचनैस्समयामासताशुचम् ० । ततो मंदाकिनीं गत्वा स्नात्वा ते वीतकल्मषाः ॥ राज्ञे ददुर्ज्जलं तत्र सर्वे ते जलकांक्षिणे ०॥ पिंडान्निर्व्वापयामास रामो लक्ष्मणसय्युँतः ॥ इङ्गुदीफलपिण्याकरचितान्मधुसंप्लुतान् । यदन्नः पुरुषो राजँस्तदन्नाः पितृदेवताः ॥ इति दुःखाश्रुपूर्णाक्षः पुनः स्नात्वा गृहय्यँयौ० सर्व्वे रुदित्वा सुचिरं स्नात्वा जग्मुस्तथाश्रमं ० । तस्मिंस्तु दिवसे सर्वे उपवासम्प्रचक्रिरे ०॥ अत्र तद्दिवसे उपवासश्रवणात्पिंडपदोत्तरबहुवचनश्रवणाच्च पूरकपिंडदानमेवावसीयते० मधुसूदनठक्कुरकृतजीर्णोद्धारे,, रामायणे आनयेंगुदिपिण्याकं पत्रं बोधिद्रुमस्य च० मंदाकिनीं समासाद्य करिष्ये उदकक्रियां० । ऐङ्गुदं बदरोन्मिश्रं पिण्याकं दर्भसंस्तरे० लुप्तपिंडांस्ततोराम इदं वचनमब्रवीत् । इदं भुङ्क्ष्वमहाराज प्रीतो यदशना वयम् ० यदन्नपुरुषा राजँस्तदन्नास्तस्य देवताः । पितृदेवता इत्यपि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



पाठः । पिप्पलपत्रादाने पुनः प्रधानाधिकारिणः पिंडदाने च मूलमिति० सामधेनीन्यायवत्सहस्र ऋषयो गामेकामिति न्यायवच्च० भिन्नकर्तृत्वेन न कृतकरणत्वदोषः । भरतस्तु न कदापि राज्ये सन्तुष्टः । इति० भरतश्चेत्प्रतीतस्यादित्यत्र चेत् स्यात्पदाभ्यां स्पष्ट एव स्यादिति सम्भावनायां लिङि-कृतकरण मेव० । "यच्च आदिपुराणं० । प्रथमेहनि यो दद्या-त्प्रेतायान्नं समाहितः । यत्नान्नवसु चान्येषु स एव प्रददा-त्यपि । तत्र एवापिशब्दौ भिन्नक्रमौ० सोपि प्रददात्येवेत्य-र्थः । "यच्च वायुपुराणं०" असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्० । यश्चाग्निदाता प्रेतस्य पिंडं दद्यात्स एव हि० । अत्रएव शब्दः अप्यर्थकः "अव्ययानामनेकार्थत्वा-त्" प्रागुक्तविष्णुसूत्रनानावचनैकवाक्यत्वाच्च" एतेन दा-हकर्त्तैव दशाहं समापयेदिति मिताक्षरोक्त एवकारोपि प्र युक्तः । यत्तु" निर्व्वर्त्तयति यो मोहात्क्रियामन्यनिवर्त्ति तां० विधिघ्नस्तेन भवति पितृहा चोपजायते० । तस्मात्प्रेत-क्रिया येन केनापि च कृता यदि न तां निर्वर्त्तयेत्प्राज्ञः सतां धर्म्ममनुस्मरन् । येन केनापि कनिष्ठेनापि कृतायां पितुः प्रेतत्वपरिहारायाद्यश्राद्धादिक्रियायां० पुनस्तां ज्येष्ठो न नि-वर्तयति न करोतीत्यर्थः: कुर्वन्विधिघ्नः पितृहा च भवति० । एवं च० यस्मिन्देशे कुले वा केनापि पितुः श्राद्धे कृते स-र्व्वेषां पातित्यपरिहारः । एवं समाचारस्तत्रमूलमि-दम्० ॥ * ॥ युक्तं चैतत् ० 'तथाहि" यस्य ज्येष्ठः पुत्रो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



विदेशस्थः । तस्य मरणे कनिष्ठपुत्रेण सपिंडनान्तकर्म्मणि कृते पितुः प्रेतत्वपरिहारे पश्चादागतेन ज्येष्ठेन पुत्रेणाकृतपूरकपिंडदानेन पितुः प्रेतत्वमनवगतेन पितृगत प्रेतत्वविमुक्तिफलकषोडशश्राद्धं कथं कर्त्तव्यं स्यात्० नच पितुः प्रेतत्वपरिहारे फलाभावात् स न कुर्य्यादिति वाच्यं० ॥ अकृतेपि कृते वापि कनिष्ठाभिदिरौरसैः । यत्र कुत्रापि ज्येष्ठस्याधिकारः प्रेतकर्म्मणीति स्मृतिसारधृतशातातपवचनेन तस्यावश्यकत्वात्" अधिकारबोधनाच्च० । अधिकारबोधकवचनेन प्रेतपदघटितेन पितुः प्रेतत्वकरणस्यावश्यकत्वात्०" अपि च" कृतदौहित्रादि-कृत्रिमपुत्रे मृते तस्य सगोत्रेण कृते दाहे प्रथमदिवसीयपिंडदाने च कृते पश्चादागतेनोक्तकृत्रिमपुत्रेण स्वाशौचान्तद्वितीयदिवसे तन्मरणचतुर्थदिने तृतीयदिने वा पूरकपिंडदानमंतरा तस्य प्रेतत्वविमुक्ति-फलकषोडशश्राद्धं कथं तेन कर्त्तव्यं स्यात्० दाहकर्त्तुः सपिंडस्याशौचस्याबशिष्टत्वेन तत्पिंडदानेन निः पाद्यप्रेतशरीरस्येदानीमनिःपादात्" "तथा चोक्तानि' युक्तिरहितानि गरुडपुराणादि-सामान्यवचनसङ्कोचकानि ० पूरकेण तु पिंडेन देहो निः पाद्यते यतः कृतस्य करणायोगात्पुनर्भावर्त्तयेत्क्रियामित्यादीनि वायुपुराणादिविशेषवचनान्यनादरणीयानि,, धर्म्मशास्त्रविरोधे तु० युक्तियुक्तस्यैव धर्म्मशास्त्रस्यादरणीयत्वात्" ॥ अत्र "एव" नारदः" धर्म्मशास्त्रविरोधे तु युक्तियुक्तो विधिः स्मृतः । व्यवहारो हि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



वलवान् धर्म्म स्तेनावहीयते,, ॥ "अवहीयते अवगम्यते" । हि गताविस्मधातोः ॥ वृहस्पतिरपि ० । केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः । युक्तिहीनविचारे तु धर्म्महानिः प्रजायते ० ॥ इति ॥ ननु पूर्व्वक्रियाया आतिवाहिकदेहत्यागोत्तरदेहान्तरजननम्मध्यक्रियाया अपि शरीररूपप्रेतत्वस्य परिहारोत्तरदेहान्तरजननम् "एवं च" पूर्वक्रियाद्वयजन्यशरीर-द्वयमापद्येत् ० "तत्र" एकया मध्यक्रियया-एकस्य शरीररूपप्रेतत्वस्य नाशेपि शरीरान्तररूपप्रेतत्वस्य विनाशान्महद्धैषम्यं स्यादिति चेन्न० । पितृगतप्रेतत्वपरिहारफलकषोड़शश्राद्धे नैव शरीरद्वयरूपप्रेतत्वद्वयस्य परिहारसम्भवात् ० ॥ संकल्प्यवाक्ये कार्य्यकारणभावे च० प्रेतत्वेनैव प्रेतत्वस्य प्रवेशात् ० 'तथाहि" । नैकशरीररूपप्रेतत्वविमुक्तिहेतुषोडशश्राद्धमहं करिष्ये इति संकल्पः ॥ नो वा ० । महत्तपिंडजन्यशरीररूपप्रेतत्वविमुक्तिहेतुषोडशश्राद्धमहं करिष्ये । अपितु । प्रेतत्वविमुक्तिहेतुषोडशश्राद्धमहं करिष्ये इत्येव संकल्पः ॥ कार्य्यकारणभावश्च० "यदि श्राद्धकर्तृकर्तृकपूर्व्वक्रियानिः पाद्यपितृगतशरीरात्मकप्रेतत्वपरिहारं प्रति तत्कर्तृकषोडशश्राद्धं कारणं ब्रूषे० ॥० तर्हि ० यत्रान्येन दाहः कृतः तत्र तत्क्रियानिः पाद्ये शरीररूपप्रेतत्वे व्यभिचारस्स्यात् ० ॥ दाहकर्तृकर्तृकषोडशश्राद्धस्य तत्रासत्वात् ० । "यदि च' दाहकर्तृत्वेन दाहकर्त्तारन्निवेश्य,, श्राद्धकर्तृत्वेन श्राद्धकर्त्तारं च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



निवेश्य, दाहकर्तृकक्रियानिः पाद्यप्रेतत्वपरिहारम्प्रति श्राद्धकर्तृकर्तृकषोडशश्राद्धं कारणमिति कार्य्यकारणभावकल्पनया० नोक्तव्यभिचार इति ब्रूषे० । "तर्हि" कर्तृत्वस्याप्यननुगतत्वाल्लाघवाच्च, उद्देश्यतासंबंधेन प्रेतत्वपरिहारम्प्रति उद्देश्यतासंबंधेन षोडशश्राद्धं कारणमिति० कार्यकारणभावकल्पनया अनेक पूर्व्वक्रियानिः पाद्यस्यानेकशरीररूपपितृगतप्रेतत्वस्य पुत्रकर्तृकषोडशश्राद्धेन परिहारस्य विवादसिद्धत्वान्न कोपि शंकालेशः ॥ अथ प्रेतत्वं किम् । नारकीयशरीरपरिग्रहणं प्रेतत्वम्० ॥ तथैव रत्नाकरप्रसिद्धेः । यस्यैतानि न दीयंते प्रेतश्राद्धानि षोडश पिशाचत्वं स्थिरन्तस्य दत्तैः श्राद्धशतैरपि० ॥ इति याम्यस्मरणाच्चेति० । "केचित्" तन्न नारकीयशरीरपरिग्रहस्य तत्तत्कालावच्छिन्न भोगार्थ तत्तद्दुरितारब्धस्य प्रेतश्राद्धैर्न्नाशायोगात् । तस्मात्पार्ब्वणश्राद्धानर्हत्वम्प्रेतत्वम्० ॥ पितृत्वप्राप्तिरपि पार्ब्वणश्राद्धार्हतैव नान्या काचिदिति० । श्रीदत्तोपाध्याय—वाचस्पतिमिश्र—केशवमिश्ररुद्रधरोपाध्याय-गोकुलनाथोपाध्यायादीनां सिद्धान्तवादिनां मतेनापत्ति शंकाकलंकाकणिकेति० ॥ यानि तूक्तवचनयुक्ति विरुद्धानि निबंधलिखनानि तादृशानि पूरकेण तु पिंडेन देहोनिः पाद्यते यत इत्यादीनि विशेषवचनानि० तान्यपि दशविशेषपराणि आचारविशेषपराणि वा संतु न तत्र विदामः ॥ "अत एव नारदः" । धर्म्मशास्त्रविरोधे तु युक्तियुक्तो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



विधिः स्मृतः । व्यवहारो हि बलवान् धर्म्मस्तेनावहीयते० इति ॥ बृहस्पतिरपि । केवलं शास्त्रमाश्रित्य न कर्त्तव्योविनिर्णयः । युक्तिहीनविचारैस्तु धर्म्महानिः प्रजायतेः । "युक्तिर्न्यायः" स च लोकव्यवहार "इति मरीचिः" । येषु स्थानेषु यच्छौचधर्म्माचाराश्च यादृशः । तत्र तत्रात्रमन्येत धर्म्मस्तत्रैव तादृशः । मनुः । येनास्य पितरो याता येन याताः पितामहाः । तेन यायात्सतांमार्गं तेन गच्छन्न दुष्यति० । "अत एव" यत्तु मिताक्षरायाम् पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति पैठीनस्युक्तम्" तत्कलिंगगौडादौ दशे व्यवस्थितम्० ॥ तेषां तथाचरणात्० "तथाच" वामनपुराणं,, देशानुशिष्टं कुलधर्म्ममग्र्यं स्वगोत्रधर्म्मं न हि संत्यजेच्च "इति स्मार्त्तरघुनन्दनभट्टाचार्य्या आहुः" ॥ "अत एव,, व्यासः । एकोद्दिष्टं तु कर्त्तव्यम्पित्रो श्चैवमृताहनि एकोद्दिष्टं परित्यज्य पार्व्वणं कुरुते नरः । अकृतं तद्विजानीयाद्भवेच्च पितृघातकः ॥ सपिंडीकरणं कृत्वा कुर्य्यात्पार्व्वणवत्सदा । प्रतिसंवत्सरं श्राद्धं छागलेयोदितोविधिः ॥ यस्सपिंडीकृतं प्रेतं पृथक् पिंडे नियोजयेत् । विधिघ्नस्तेन भवति पितृहा चोपजायते ॥ इत्युभयत्र विधिनिषेधकवचनानि" निर्णयसिंधौ कमलाकरेणाचारभेदेन व्यवस्थापितानि" । अतएव"दाक्षिणात्याः" पितुर्म्मातुर्वा सांवत्सरिकं क्षयतिथौ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



त्रिपिंडकश्राद्धमाचरंति । "गौडाश्च ,, प्रथमसांवत्सरिकक्षयतिथौ एकोद्दिष्टश्राद्धमपि नाचरंति० । स्वस्वनिबंधेषु तथैवसिद्धांतितत्वात् । मैथिलनिबंधेषु ,, एकोद्दिष्टप्रापकवचनानि लिखित्वा प्रथमसांवत्सरिकं क्षयतिथौ पित्रोरेकोद्दिष्टश्राद्धमेव व्यवस्थापितम् । तन्निबंधश्राद्धालवस्तथैवाचरंति संति चैवं विधा बहव आचारभेदा इति विस्तरभयान्न लिखामः ॥ इति विद्वत्पाम्परामर्षः ॥*॥

श्रीढुण्ढिराजो विदधातु भद्रं वाराणसीस्थैरमरैः प्रयुक्तः बद्धाञ्जलिः प्रार्थयते मुहुस्तत् सदाशिवो येन भवेदिदंसत्० ॥१॥*॥

अथ ब्राह्मणादि-चतुर्व्वर्णानां सङ्क्षेपतः शुद्धिविवेचनमुच्यते० ॥ "तथाहि" शुद्ध्येद्विप्रोदशाहेन ,, द्वादशाहेन भूमिपः । वैश्यः पञ्चदशाहेन ,, शूद्रो मासेन शुद्ध्यति० ॥ सपिण्डे मृते सतीत्यर्थः । सकुल्ये मृते चतुर्णां त्रिरात्रेण । कुलजे मृते (१) पक्षिण्या० । गोत्रजे मृते स्नानोदकदानेन शुद्धिः ॥ सपिण्डादिगणना तु वोजिपुरुषात्० । ( अथ सपिण्डादिलक्षणम् ) सप्तपुरुषावधयः सपिण्डाः ,, तदूर्द्ध्वं दशयावत् सकुल्याः ,, तदनन्तरं ज्ञाने जन्मनाम्नोः कुलजाः, अज्ञाने अस्मत्कुलोत्पन्नाइत्येवमाकारेण ज्ञानगोचरा गोत्रजाः (सपिंडादिजन्मन्यपि) सर्व्वेषां

(१) पूर्व्वापररात्रिद्वयसहितं दिनं तादृशदिनद्वयसहिता रात्रिर्व्वा पक्षिणी० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



मरणवदशौचम्० ॥ सपिण्डादिः कुमारीणां पितुः, विवाहितानां च पत्युः ॥ ( अथाशौचशङ्करः ) सर्ब्बवर्णानां स्वस्वसम्पूर्णाशौचपूर्व्वार्द्धे समकालिकाशौचान्तरपाते पूर्व्वाशौचव्यपगमेन, अशौचान्तदिनोनाग्रिमदर्धे (२) अग्रिमाशौचव्यपगमेन शुद्धिः, अशौचान्तदिने तत्पाते तु तदिनोत्तरदिनद्वयेन, तदिने रात्रिशेषे अरुणोदयवेलायां सम्पूर्णाशौचपाते तदिनानन्तरदिनत्रयेणोपशुद्धिः० ॥ त्र्यहाशौचे त्र्यहाशौचपाते अग्रिमव्यपगमेन शुद्धिः । जननेऽल्पदिनव्यापकमपि मरणाशौचं बलवत् बलवतैवोपशुद्धिः । प्रसववत्स्त्रीणां तु प्रसवाशौचमेव बलवत् तेनैव शुद्धिः । तेन स्त्रीणां पतिमरणे तदिने पुत्रजन्मनि विंशतिदिनेभ्यऊर्द्धं दुहितृजन्मनि मासादूर्द्धं, तच्छ्राद्धादावधिकारः ॥ ( अथ विदेशस्थाशौचम् ) विदेशस्थमरणाशौचाव्यतीते तन्मरणश्रवणे तदशौचस्य यावदवशिष्टं तावदेवाशौचम्० । सम्पूर्णाशौचेऽतीतेषण्मासाभ्यन्तरेमपिण्डमरणश्रवणे त्र्यहेन शुद्धिः, नवममासपर्य्यन्तं पक्षिणी, ततो वर्ष यावदेकाहोरात्रम्० । ततः स्नानोदकदानमात्रम्० ॥ त्र्यहाशौचेऽतीते सर्व्वत्रस्नानजलदानमात्रम्० ) ॥ जननाशौचेऽतीते अशौचन्न० ॥ एकाहेन यत्रत्या वार्त्ता न श्रूयते स विदेशः ॥ अथ बालाद्यशौचम् ॥ सर्व्ववर्णानां षण्मासाभ्यन्तरबालमरणे सद्यश्शौचम्० । सप्तममासादार-

(२) पूर्व्वार्द्धाव्यवहितोत्तराशौचव्यपगमेनेति भावः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



भ्य द्विवर्षं यावद्ब्राह्मणाना महोरात्रम्० । ततः षड्व-
र्षसमाप्तिं यावत्त्रिरात्रम्" ततः सम्पूर्णाशौचम्० ॥ सप्तममा-
सादारभ्य द्विहर्षं यावत्क्षत्रियाणां द्व्यहम्० । ततः षड्वर्षं
यावत् षडहम्" ततोद्वादशाहम्० ॥ वैश्यानां सप्तममासाद्वि-
वर्षं यावत्त्र्यहम्०" ततः पञ्चवर्षय्यँावन्नवाहम्"ततः
पञ्चदशाहम्"० ॥ सप्तममासाद्द्विवर्षयावच्छूद्राणां पञ्चाहम्"
ततः षोड़शवर्षं यावदविवाहिते मृते द्वादशाहम्" " ततोमा-
सम्" विवाहिते अष्टममासादेवोपरिमास मशौचम्" एते-
नायमवगम्यते द्विवर्षोत्तरमष्टवर्षं यावदविवाहितेमृते द्वा-
दशाहम् विवाहिते मासम्० ॥ यच्छूद्राणां मासि मासि
मुण्डनंद्विजसुश्रूषा द्विजोच्छिष्टभोजनं ते सच्छूद्राः तेषां
सप्तममासात्पञ्चमवर्षं यावत् बालमृते त्र्यहम्" षोड़शवर्षं
यावदनुद्वाहिते द्वादशाहम्" ततोमासम्" सर्व्वप्रसूतीना-
मेव दशाहाभ्यन्तरे बालमृते यावद्दशाहं पूर्य्यते तावदशौ-
चम्० ॥ असम्पूर्णद्विवर्षो बालः सर्व्वेषां भूमौ निखन-
नीयः ॥ प्रमोदादिना तद्दाहे कृते ब्राह्मणानां त्रिरात्रम्'
क्षत्रियाण मेकादशाहम्" द्वादशाहं वैश्यानाम्" शूद्राणां विं
शतिरात्रमशौचम्" ॥ यच्छूद्राणां दशाहाशौचं क्वापि भ-
वति तेषामाचारात्सर्व्वत्र ब्राह्मणवद्व्यवस्था० ॥ अथ स्त्र्य-
शौचम् ॥ द्विवर्षं यावत् सर्व्वेषां कन्यामरणे सद्यः शौ-
चम्" द्विवर्षोत्तरं त्रिरात्रम्" दहित्वा च वहित्वा च त्रिरात्र
मशुचिर्भवेदितिवचनात्" आचाराच्च" उद्वाहिता स्त्री यदि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



प्रसूयते मृयते वा तदा मातृ-पितृ-भ्रातृ वैमात्रेय-पितृव्य-पितृव्यपुत्रादीनां त्र्यहाशौचम्" शास्त्रान्तरसिद्धमैथिलोयव्यवहारात्" उद्वाहितस्त्री पाणिग्राहकादन्यं यमाश्रयति तस्य तत्सवे मरणे वा त्र्यहाशौचम्" यदि पाणिग्राहकेन तत्सङ्क्रमः कृतः तदा तस्याः पाणिग्राहकगोत्रमेव स्वयं गृहकगोत्रन्न" यदि सङ्क्रमो न कृतः तदा सा स्वयङ्ग्राहकगोत्रैव अशौचं तु तत्रापि त्र्यहमेव, स्वयङ्ग्राहकस्य० कन्यामरणे द्विवर्षाद्विवाहान्तं अदाहकानामेकाहोरात्रम्० ॥ अथगर्भस्रावाशौचम् ॥ मासत्रयं यावदगर्भस्रावे ब्राह्मण्यास्त्रिरात्रम्" ततः षण्मासंयावत् अतीतमाससमसङ्ख्यकदिनानि" षण्-मासोपरि दशाहाशौचम् " पतिपुत्रादिसपिण्डानां सद्यश्शौचम् " ॥ मासत्रयं यावत् क्षत्रियाया दिनचतुष्टयम्" वैश्यायाः पञ्चाहम् " ततऊर्द्ध षण्मासं यावत् उभयोरप्यतीतमाससमसङ्ख्यकदिनानि" ततः क्षत्रियाया द्वादशाहम" वैश्यायाः पञ्चदशाहम्० ॥ शूद्राया मासत्रयं यावदष्टाहम" ततः षण्मासं यावदतीतमाससमसङ्ख्यानि दिनानि" ततो मासमशौचम्० ॥ अत्र सर्व्वत्र निर्गुणसपिण्डानामेकाहम्" त्र्यहं यथेच्छारचणानाम्० ॥ अथ भिन्नगोत्राशौचम्० ॥ आचार्य्यमरणे तत्संस्कारकर्त्तुः शिष्यस्य दशाहं" असंस्कारकर्त्तुस्त्र्यहाशौचम्" आचार्य्यनीउपाध्याय-उपाध्यायी-मातामह--आचार्य्यपुत्र—मातामहीश्वश्रू श्वशुर-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



मातुलमातृष्वस्रेय—मातुलानी-मातृष्वसृ-पितृष्वसृ-मातुर्वैमात्रेय-मातुर्म्मातृष्वस्रेय-मातुर्म्मातुलपुत्र-मातुलपुत्र-भगिनी-भागिनेय-शिष्य-भागिनेयी-दौहित्र-श्यालक-जामातृ-मित्रादिमरणे त्रिरात्रम्" आचार्य्यानीतोत्तपर्य्यन्तं स्पष्टप्रतिपत्यर्थं द्वन्द्वैकशेषादिनियमो न कृतः ॥ अथक्रिया ॥ मृतक्रिया त्रिविधा भवति ( तथाहि ) दाहादशौचान्तं यावत्पूर्व्वा, तदः सपिण्डीकरणान्तमध्यमा' ततएकोद्दिष्टादिरूपोत्तरा० ॥ अथाधिकारिणः ॥ अक्षतादिवाधितज्येष्ठौरस-कनिष्ठौरस-पुत्रिकापुत्र--पौत्र--प्रपौत्रादि--प(१)त्नी कृत-कृत्रिमपुत्र-कनिष्ठसोदर-कनि-ष्ठवैमात्रेय--ज्येष्ठसोदर--ज्येष्ठवैमात्रेय--पितृ--भ्रातृपुत्र-सपिण्डाः पूर्व्वपूर्व्वाभावे यथाक्रममुत्तरोत्तराधिकारिणः ॥ एतेषामभावे सपिण्डस्त्री-कन्या-सकुल्य-मातृसपिण्ड-मातृसकुल्याः । कुलद्वयाभावे माता० ॥ असमाप्तषड्वर्षस्य पूर्व्वक्रियामात्रम्" तत्र तद्भ्रातृपित्रादयोऽधिकारिणः ॥*॥ द्विवर्षपर्य्यन्तस्य पूर्व्वक्रियापि न भूमिनिखननमात्रमेव" ॥ स्त्रिया अपि द्विवर्षपर्य्यन्तं भूमिनिखननमात्रम्" ततो-विवाहपूर्व्वं पूर्व्वक्रियामात्रम' क्रमेण पितृभ्रात्रादिस्तत्रा-

[१] दैवाच्छ्राद्धकर्तृस्त्रियारजोयोगः तदा रजोयोगाद्य दिना त्षञ्चमदिने तयाश्राद्धं विधेयम्" "तथाहि" देवे तु पितृणांश्राद्धेअशौचं जायते यदि० । तदशौचव्यतीते तु तेषां श्राद्धं विधीयते० ॥ शुचि भूतेन दातव्यमित्यादिकेशवमिश्रदैतपरिशिष्टवचनाभ्याम्" अन्यत्राप्यूहः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



धिकारी" विवाहितायास्तु त्रिविधक्रियासु यथाक्रमम् पुत्र-सपत्नीपुत्र-पति-स्नुषा-पौत्र-प्रपौत्र-सपिण्ड-सकुल्य-पितृस-पिण्डादयः "विदध्यादौरसः पुत्रो जनन्या और्द्ध्वदेहिकम्" तदभावे सपत्नीजः कृत्तिमाद्यास्तु तावृते इत्यादिवचनश्राद्धमञ्जरीभ्याम् विवाहितायाः पुत्र-सपत्नीज-कर्तृ-स्वाम्य-भावे अवीराकल्पश्राद्धं सव्वँत्सरेण भवितव्यम्०॥ अपरि-णीतशूद्रस्य द्विवर्षानन्तरं पूर्व्वक्रियामात्रं भ्रात्रादिस्तत्राधिकारी" विवाहितस्य त्रिविधासु पुत्राद्यधिकारी पूर्व्ववत्०॥

अथ पर्णनरदाहः॥ दाह्यशरीरालाभे चतुर्णां यथा-क्रमम् अशौचाभ्यन्तरेऽष्टम-दशम-त्रयोदश-अष्टाविंशतिदिने-तच्छ्राद्धाधिकारिणा तदनधिकारिसजातीयेन वा पर्णनरदा-हः कर्त्तव्यः। तदसम्भवे" नवमैकादशचतुर्दशोनत्रिंश-द्दिने-चतुर्णां क्रमेण" तत्राप्यसम्भवे पक्षत्रयानन्तरामावा-स्यादौ०। पक्षद्वयानन्तरमिति केचित्॥ आदिनाऽष्टम्येका-दशी०॥ यो यन्मासि यत्तिथौ गेहादेशान्तरं गतः तस्य-वार्त्ता द्वादशवर्षान्तं यदि पत्र द्वारापि न श्रूयते तदा द्वा-दशाब्दमतीत्य तन्मासि तत्तिथौ कर्त्तव्यः। तत्तिथेर-ज्ञाने तन्मासीयामायाम्' तन्मासाज्ञाने आषाढ़ामायाम्॥ पर्णनरदाहे कृते पुनरस्थ्नां लाभे लौकिकाग्निना दाहः। पृतभ्रान्त्या दाहे कृते पुनरागच्छेत् तदा प्रायश्चित्तंविधा-याश्रमे विशेत्०। अशौचान्तरे पर्णनरदाहे यावदवशि-ष्टमशौचस्य तावदेवाशौचम्' पक्षत्रयानन्तरं दाहे त्र्यहं, च-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



तुर्थेहन्याद्यश्राद्धम् पञ्चमे सपिण्डनम्० । अथपर्णनरपलाशपत्रन्यासमकारः ॥ शिरसि ४० ग्रीवायां १० बाहुद्वये १०० अङ्गलीषु १० उरसि ३० जठरे २० शीर्ष्णे ४ दृषाणद्वये ६ उरुदेशे १०० जानुङ्घयोः ३० पादाङ्गुलीषु १० कृष्णसारचर्म्मणावे ष्टयित्वोर्णातन्तुनानिवद्धयसोदकयवचूर्णेन लेपयित्वा' असौ स्वर्गाय लोकायनम इति मन्त्रेण दाहयेत्" विशेषः शुद्धिविवेकादौ द्रष्टव्यः ग्रन्थविस्तरभयान्नलिखितः" ॥ * ॥ शम्भूयात् ॥ श्रीसदाशिवः ॥

॥ * ॥ इति शुद्धिविवेचनम् ॥ * ॥

अथैकादशाहेऽशौचापाते श्राद्धविचारः ॥ सूर्य्योदयानन्तरमेकादशाहे पूर्व्वमृतश्राद्धाधिकारिणो मुहुर्त्तद्वयाभ्यन्तरे सम्पूर्णाशौचापाते अग्निमाशौचव्यपगमेन शुद्धिः । तदैव श्राद्धकर्म्माधिकारश्च० ॥ तदिने द्विमुहूर्त्तादूर्द्ध्वं श्राद्धसङ्कल्पदृत्तेऽशौचान्तरोपनिपाते आद्यश्राद्धं न प्रतिवद्धयते सङ्कल्पितस्यानिवृत्तेः० । मासिक--सपिण्डीकरणानि तु द्वादशेऽहनि तदा न भवेयुः श्राद्धसङ्कल्पे यथा कालमित्युल्लेखनात्" अशौचस्य च श्राद्धकालत्वाभावात्० ॥ आद्यश्राद्धन्तु आद्यमेकादशेऽहनीति वचनेन एकादशेऽहनि नियतं सङ्कल्पितञ्च' इत्यनवकाशतयाऽशौचान्तरेपि कर्त्तव्यमेव० । मासिकसपिण्डनानान्तु कल्पान्तरस्यापि सावकाशतया सत्वात् कल्पान्तरेणापि कर्त्तव्यानि० । तदा प्रत्युत मासिकद्वयं षष्ठमासिकात्प्राक् कस्मिंश्चिदिने-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



ऊनषाण्मासिकं एवं द्वादशमासिकात्मागूनवार्षिकं सव्वँत्सरान्ते मरणतिथौ सपिण्डनं तत्रैव प्रथमवार्षिकं चैकः कल्पः । प्रतिमासं मरणतिथिसजातीयतिथौ मासिकानि पूर्व्ववदूनमासिद्वयं वत्सरान्ते सपिण्डनादि पूर्व्ववदेवेति द्वितीयः कल्पः । "यदि तु" एकादशाहे मुहूर्त्तद्वयादूर्द्ध्वं षोड़शश्राद्धसङ्कल्पात्मागेवाशौचान्तरमुत्पद्यते तदा श्राद्धपातप्रयुक्तदोषो दुर्व्वार एव" तदा गयायां श्राद्धकरणादेव कर्त्तुः पातित्यनिवृत्तिः, "सपिण्डीकरणान्तानि प्रेतश्राद्धानि षोड़श० । यथाकालेन कार्य्याणि नान्यथा मुच्यते हि सः ॥ १ ॥ गयायां पिण्डदानेन प्रेतत्वं मुच्यते ध्रुवम्० । अन्यथा पतितो ज्ञेयः सर्व्वधर्म्मबहिष्कृतः ॥२॥ इति श्राद्धलताधृतवचनात्० ॥ अथैकादशाहः ॥ एकादशाहश्राद्धं अशौचान्तद्वितीयदिन एव कर्त्तव्यं 'तथाहि" आद्यमेकादशेऽहनीति" 'अत्रैकादशपदमशौचान्तद्वितीयदिनोपलक्षकम्. तत्र शय्या फलवस्त्रयुताश्चनपुरुषदानद्विजदम्पतिपूजन वृषोत्सर्ग्ग—कपिलादानादि कर्त्तव्यम्. तथाहि "स्मृतिः" अशौचान्तद्वितीयेऽहनि शय्यां दद्याद्विलक्षणाम्० । काञ्चनम्पुरुषन्तद्वत्फलवस्त्रसमन्वितम्० । सम्पूज्य द्विजदाम्पत्यं नानाभरणभूषितं वृषोत्सर्ग्गस्तु कर्त्तव्यो देया च कपिला शुभा० ॥ षोडशश्राद्धं सर्व्वापेक्षयाल्पावश्यकम्. तथाहि' सरोजकलिकायाम्, यस्यैतानि न दीयन्ते प्रेतश्राद्धानि षोडश० । प्रेतत्वं हि स्थिरं तस्य दत्तैः श्रा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



द्धशतैरपीति० ॥*॥ अथ सपिण्डीकरणम् ॥ मृतपिण्डादि-मेलनं मृतपित्रादिपिण्डे "तथाहि" पितामहेन पितरं संस्कुर्य्यादिति निश्चयः ॥ "स्त्रियास्तु" पत्यौ जीवति श्वश्रू-प्रश्वश्रू-वृद्धप्रश्वश्रूभिः । मृते पत्यौ पति-श्वशुर-प्रश्वशुरैः ॥ "तथाहि गोभिलः" अपुत्रायां मृतायान्त्वित्यादि० । मृतपत्निकादिविचारस्तु मेलनसमये ( मेलनसमये यदि मृतपतिका भवेदिति भावः मेलनानुरोधात् ) यदि मातृपित्रोरेकस्मिन्नेव दिने दैवाच्छ्राद्धं भवेत् तदा पितुरेव-प्रथमं श्राद्धं ततो मातुः यतस्तस्या मेलनं स्वपत्या साकमेव स्यात्तदनुरोधात् पूर्व्वमृतत्वान्मातुरेव पूर्व्वमिति केचित्तन्नादरणीयम्० । अग्रिमदिनमेलनानुरोधात्० ॥ यदि पित्रेकादशाहदिने मातृद्वादशाहश्चुक्तिर्हैवाद्भवेत्तदा मातुर्द्वादशाहं कृत्वा पितुरेकादशाहं कुर्य्यात् तद्दिने तस्याः पत्या सह मेलनाऽसम्भवात् पूर्व्वमृतत्वाच्च, मेलनं प्रेतेन साकन्न भवति ॥ सपिण्डीकरणान्नमेव प्रेतपदप्रयोगः "तथाहि" सपिण्डीकरणस्यावत्प्रेत-प्रेत इति स्मृतः । सपिण्डीकरणादूर्द्ध्वं शर्म्मवर्म्मादिभाग्भवेदिति ॥ कृतषोडशश्राद्धसङ्कल्पे श्राद्धकर्त्तरि मृते तत्कनिष्ठेनाप्यवशिष्टश्राद्धानि कार्य्याणीति श्राद्धप्रदीपः ॥ अथ मलमासे वार्षिकविचारः ॥ वाचस्पति-मिश्रतोगोकुलनाथोपाध्यायमते अयमेव विशेषः । 'तथाहि, आश्विनकृष्णमृतस्य अग्रिमभाद्रस्य मलमासत्वे मा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



सिकवृद्ध्यावश्यकत्वात् आश्विनकृष्णे एव प्रथमादिवार्षिकम् न तु द्वितीयभाद्रकृष्णपक्षे,, इति न मासोल्लेखासङ्गतिः० ॥ एवं मलमासकृष्णमृतानां मासिकवृद्धिर्न सव्वँत्सराभ्यन्तरे तस्य मध्यमचिह्नसम्बन्धात्मकाधिमासपाताभावात्० । विस्तरतो-गोकुलनाथोपाध्यायस्य मासमीमांसायां द्रष्टव्यम्० ॥ एतदन्यत्समानमेव० ॥ 'तदिहोच्यते,, भाद्रशुक्लप्रतिपदादि-पूर्णिमान्ते मृते अग्निमभाद्रस्य मलमासत्वे शुद्धभाद्रशुक्ले एव प्रथमाब्दिकम्,. न तु मलमासशुक्ले० । एवं मलमासकृष्णमृतस्य अग्निमवर्षे प्रथमम् , मलमासशुक्लमृतस्य अग्निवर्षे चरमम् प्रथमाब्दिकम्० ॥ यद्यप्ययं व्युत्क्रमः पूर्वमृतस्य पश्चादेकोद्दिष्टम्,, "परं च,, शास्त्रानुभवसिद्धत्वान्न दोषावहः । व्यवहारोप्ययमेव० । यदि भाद्रे मलमासः तदा शुद्धभाद्रकृष्णमृतस्य तन्मलमासकृष्णमृतस्य च अग्निमवर्षीयभाद्रकृष्ण एवोभयोरेकोद्दिष्टम्, अन्यथा, मासोल्लेखासङ्गतिस्स्यात्, एवं शुक्लेपि,, इति सुधियो विभावयन्तु० ॥ अथ चतुर्थीकर्म्मणः प्राक्कन्यामरणे श्राद्धनिर्णयः ॥ विवाहितायाः कन्यायाश्चतुर्थीकर्म्मणः प्राङ्मरणे पतिगोत्रेणैव तच्छ्राद्धं पत्या करणीयम्,, यद्यपि चतुर्थीहोममन्त्रेण त्वङ्मांसहृदयेन्द्रियैः । भर्त्ता सय्युँज्यते नारी तद्गोत्रा तेन सा भवेदिति-संस्थितायां तु भार्य्यायां सपिण्डीकरणान्तिकम्० । पैतृकं भजते गोत्रमित्यादि--केचन्मिश्रकृतद्वैतपरिशिष्टीय-बृहस्पतिवचनार्थ-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



वचनानि "तथापि,, स्वगोत्राद्भ्रस्यते नारी विवाहात्सप्तमे-पदे० । पतिगोत्रेण कर्त्तव्यास्तस्याः पिण्डोदकक्रियाः, पा-णिग्राहणिकामन्त्राःपितृगोत्रापहारकाः० । भर्तृगोत्रेण नारि-णा न्वेयं पिण्डादिकं ततः,, देशानुशिष्टं कुल-धर्म्ममुख्यं स्व-गोत्रधर्म्मन्नहि सन्त्यजेच्चेत्याद्युद्वाहतत्वीयहारीतवचन-बृह-स्पतिवचन-वामनपुराणेभ्यः सकलमैथिलीयव्यवहाराच्च० ॥ चतुर्थी होममन्त्रेणेत्यादि-वचनानि तु चतुर्थीकर्म्मणोत्याव-श्यकद्योतकानि० ॥ अथ पित्रादिमृतवर्षे कर्त्तव्याकर्त्त-व्ये ॥ तत्र सपिण्डीकरणमतीत्य मङ्गलक्रिया कर्त्तव्या ॥ तथाहि गरुडपुराणे १६ अध्याये,, ज्ञात्वा वृद्धिविवाहादि-स्वगोत्रविहितानि च० । विवाहन्नैव कुर्वीत सूते च गृ-हमेधिनी० । भिक्षुर्भिक्षान्न गृह्णीयाद्यावत्कुर्य्यात्सपि-ण्डनमिति,, यच्च निर्णयसिन्धौ, प्रमीतौ पितरौ यस्य देह-स्तस्याशुचिर्भवेत्० । नवा दैवं नवा पैत्र्यं यावत्पूर्णो न वत्सर इत्यादिवचनम् तत्र सव्वँत्सरपदं सपिण्डीकरणा-भिप्रायकम् द्वैतपरिशिष्टोयकेशवमिश्रव्याख्यानात्,, उक्त-वचनस्वरसाच्च,, सपिण्डीकरणमेव कदा कर्त्तव्यमित्याह व्याघ्रपादः अनन्त्यात्कुलधर्म्माणां पुंसां चैवायुषः क्षया-त्० । अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते० ॥ ए-तेन सव्वँत्सरे षण्मासे त्रिपक्षे प्राप्तस्यान्येन वचनेन सपि-ण्डीकरणस्य द्वादशाह एव मुख्यत्वम्,, ज्योतिश्शास्त्रमु-हूर्त्तचिन्तामण्यादौ यानि तत्तन्निषेधकवचनानि तानि दे-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



शविशेषपराणि० । एतेन प्रमृतपितृकस्योपनयनादि भवत्येव बाधकाभावात्,, येपि सम्प्रदायविदोजनाः महागुरुपातकवर्षे मङ्गलक्रिया न कार्य्येति व्यवहरन्ति तत्र युक्तिं न पश्यामः विशेषोदेवनाथठक्कुरनिबन्धे द्रष्टव्यः मैथिलीयव्यवहारोप्ययमेव० ॥ तत्र वर्षेऽकर्त्तव्यम्० । तीर्थश्राद्धं गयाश्राद्धं गजच्छायां च पैतृकम्० । अब्दमध्ये न कुर्व्वीत ग्रहणे न युगादिषु० ॥ १ ॥ हस्ते सूर्य्ये स्थिते या तु मघायुक्ता त्रयोदशी० । तिथिर्ज्ज्वैवस्वतीनाम सा छाया कुञ्जरस्य तु० । अस्यां गजच्छायायां पार्व्वणमावश्यकं पुत्रवता तु पिण्डरहितमेव कर्त्तव्यम्,, मघायां पिण्डदानेन ज्येष्ठः पुत्रो विनश्यतीति वचनात्० ॥ अथ सापिण्ड्यनिवृत्तिस्तत्रि० ॥ बीजिनमारभ्य सप्तमावधि सापिण्ड्यं तावत्पर्य्यन्तमेव स्वस्वजात्युक्तमशौचम् । तत ऊर्द्धं दशमावधि त्र्यहं ततः पक्षिण्यादीति स्पष्टमेव शुद्धिविवेकादौ निर्णीतम्,, एवमेव सर्व्वैरनुष्ठेयम्,, अन्यथा,, न वृद्धयेदघाहानीत्यादि-मन्वादिवचनेन निषिद्धस्य सप्तमादूर्द्धं सम्पूर्णाशौचस्य करणे निषिद्धानुष्ठानप्रयुक्तं नित्यकर्म्मानुष्ठानप्रयुक्तं च प्रायश्चित्तमापद्येत० । "इदं च,, वाचस्पतिमिश्रादिमतेनाधिकमुच्यते० । यत्सापिण्ड्यस्योभयनिरूप्यत्वेनान्यतरस्य सप्तमाधिक्येऽन्यतरस्य सप्तमान्तः पातित्वेपि सापिण्ड्यमुभयोर्न्निवर्त्तते सख्यौ गवदुभयनिष्ठत्वात्० ॥ अथ श्राद्धपूर्व्वदिने क्षौरावश्यकता० ॥ प-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



ब्रपुराणे श्रीरामम्प्रति शम्भुवाक्यम् , श्राद्धस्य दिवसे प्राप्ते पूर्व्वेद्यु र्नियमान्वितः० । निमन्त्रयात विप्रेन्द्रान् विमलक्षण-सय्युँतान्० ॥ एकभुक्तं ब्रह्मचर्य्यमन्त्यजाद्यै रभाषणम्० । दन्तधावनमभ्यङ्गनखक्लेशनिकृन्तनम्० ॥ कर्त्ता कुर्य्याच्च पूर्व्वेद्यु र्ब्भोक्ता चैव परेऽहनि० । गृहीतनियमानुक्त्वा स-र्व्वमेतत्परित्यजेत्० ॥ ब्रह्मवै० प्र० ख० २८ अ० व्रतानामु-पवासानां श्राद्धादीनां च सय्यँमे० । न करोति क्षौरकर्म्म-सोशुचिः सर्व्वकर्म्मसु० ॥ स च तिष्ठति कुण्डेषु नखादीनां च सुन्दरि तदेव दिनमारभ्य तद्भोजो दण्डताडितः० ॥ अथ हविष्यनिर्णयः ॥ हैमन्तिकं सितास्विन्नं-धान्यं मुद्गास्ति-लायवाः० । कलायं कङ्कु नोवारा वास्तूकं हिलमोचि-का० ॥ षष्टिका कालशाकं च मूलंकैमूलकेतरत्० । कन्दं सैन्धवसामुद्रे गव्ये च दधिसर्प्पिषो० ॥ पयोनुद्धृतसारं च पन-साम्रहरीतकी० । पिप्पलो जीरकं चैव नागरङ्गं च तिन्ति-लो० ॥ कदली-लवली-धात्री-फलान्यगुडमैक्षवम्० । अतैलप-क्वं मुनयो हविष्यान्नं प्रचक्षते० ॥ एवन्मैथिलभाषा० ॥ अगहनीश्वेतआरवधान मूङ तिल यव कराओ काउनि ओइरी वथुआशाक सरहाँ चीशाक गम्भडो कालिकाशाक केशौरिम-भृतिमूल "केउआंछोडिकन्द" सैन्धवलोन सामुद्रिकलोन गाइकदूधकदही गाइकघृत विनमहलगाइकदूध कटहर आम हडोर जीर नारङ्गी नेवो तेतरि हरफा अओरा गूडछोडि-मधुर अतैलपक्व हविष्य० । "आमिष्य" खेतमास कोदो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



बूट सरिसो मसुरी चोन कुर्थो मडुआ इत्यादिअन्न० ॥ ह-विष्या मिष्यवर्ज्जितखाद्य मध्यम थीक० ॥ अथ रविव्रतनि० ॥ मार्गे मासि तथा माघे वैशाखाषाढयोरपि० । शुक्लपक्षे व्रतं कुर्य्यात् सम्यग्देवस्य भास्वतः ॥ १ ॥ "तथा च" विष्णुधर्म्मोत्तरे,, ये त्वादित्यदिनं प्राप्य नक्तं कुर्व्वन्ति मानवाः । सप्तजन्मनि ते प्राप्य सम्भवन्त्यवियोगिनः ॥२॥ "ज्योतिषे" सूर्य्यव्रतं च वैशाखे मलमासो यदा भवेत्० । तदा तत्रैव कर्त्तव्यं वृषादित्ये न कारयेत्० ॥ ३ ॥ "शाम्बपुराणे" अलि मेषगत भानौ भगवत्यर्कवासरे० । शुक्लपक्षे सविधिवद्व्रतं शाम्ब समाचरेत्० ॥ ४ ॥ धनुर्वृषगते भानौ यः कुर्य्यात्सवितुर्व्रतं० । सप्तजन्मनि कुष्ठी स्याद्दरिद्रश्चोपजायते ॥ ५ ॥ देवोत्थानात्परं ग्राह्यं व्रतं देवस्य भास्वतः । कदाचिदलि-मेषार्के कृष्णपक्षे न कारयेत्० ॥*॥ अथैकादशीनि० ॥ वृद्धौ परा तु कर्त्तव्या-क्षये पूर्व्वा तु कारयेदिति महाजनपरिगृहीतवाक्यम्, "इति द्वैतपरिशिष्टे" अस्यार्थस्तु पूर्व्वस्मिन् दशमीविद्धैकादशी, उत्तरदिने एकादश्याद्वृद्धित्वात् द्वादशीविद्धैकादशी, तत्र दशमीविद्धां विहाय द्वादशीविद्धैव काय्यां "तथाहि" एकादशी दशाविद्धा गान्धार्य्या समुपोषिता० । तस्याः पुत्रशतन्नष्टं तस्मात्तां परिवर्ज्जयेदित्यादिवचनार्थवय्यपलोकनाद्द्वादशीविद्धैव ग्राह्येति० । यदि पूर्व्वदिने एकादश्याः क्षयत्वादुत्तरदिने कलामात्राप्येकादशी न तत्र पूर्व-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



दिने एव क्षयैकादशो व्रते ग्राह्य इति विदुषां परामर्शः "फलितार्थस्तु" पूर्व्वस्मिन्दशमीविद्धा परतो द्वादशीयुता तयोर्य्यदि कृता पूर्व्वा तदा पुत्रार्थनाशिनी ॥ इति सुधियो विभावयन्तु०॥ अथ श्राद्धकालमाह ०॥ पूर्व्वाह्णे मातृकं श्राद्धमपराह्णे तु पैतृकम् । एकोद्दिष्टन्तु मध्याह्ने प्रातर्व्वृद्धिनिमित्तकम्० ॥ मातृक-मन्वष्टका,, पैतृकम्पार्व्वणम्,, एकोद्दिष्टमाद्यश्राद्धादीति श्राद्धरत्ने लक्ष्मीपतिः०। मध्याह्ने (कुतुपे) कुतुपमाह" द्वौ यामौ घटिकान्यूनौ द्वौ यामौ घटिकाधिकौ। स कालःकुतुपोज्ञेयः पितृणान्दत्तमक्षयम्" ॥ विशेषमाह रत्नमालायाम्" दिनस्य यः पञ्चदशो विभागो रात्रेस्तथा तद्धि-मुहूर्त्तमानम्० । अह्नो मुहूर्त्ता विख्याता दशपञ्च च सर्व्वदा । तत्राष्टमो मुहूर्त्तो यः स कालः कुतुपःस्मृतः ॥ प्रातःकालादिकमाह" प्रातः कालो मुहूर्त्तास्त्रीन् सङ्गवस्तावदेव तु मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम् । सायाह्नस्त्रिमुहूर्त्तस्स्या च्छ्राद्धं तत्र न कारयेत्० । उभयदिने कुतुपालाभे वा पूर्व्वदिने रौहिण उत्तरदिने कुतुपः तदोभयत्र पूर्व्वदिन एवैकोद्दिष्टं कपालाधिकरणन्यायात्" उभयत्र कुतुपाभावे, रौहिणे एव 'रौहिणं न तु लङ्घयेदिति वचनात्० । उभयत्र कुतुपरौहिणाभावे सङ्गवेपि कर्त्तव्यम् ॥ अथ एकोद्दिष्ट-वि० ॥ मरणजननादिभि रेकोद्दिष्टप्रतिरोधेऽशौचापगमे,, तत्राप्यशौचे एकादश्यां मलमासेपि-एकोद्दिष्टं कर्त्तव्यम्" मरणतिथ्यज्ञाने तत्पक्षैकादश्यां, ति-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



थिपक्षाज्ञाने तन्मासैकादश्या-ममायां वा,, तद्विस्मरणे चै-त्रीयैकादश्या-ममायां वा,, पर्णनरदाहे मरणतिथौ,. तद-निश्चये पर्णनरदाहतिथौ शेषं पू० व० ॥

एकादशीपारणाकालमाह,, श्रीमद्भागव० १० स्क० पू० २८ अ० तं गृहत्वेत्यादिद्वितीयश्लोकस्य श्रीधर्य्याम्" "क लार्द्धां द्वादशीं दृष्ट्वा निशीथादूर्द्ध्वमेव हि० । आमध्याह्नाः क्रियाः सर्व्वाः कर्त्तव्याः शम्भुशासनात्' एतेन कलार्द्धद्वाद-श्यामपि कर्त्तव्यमिति सूचितम्० ॥ मासभेदेन बस्त्वाह पा-रणायाः ॥ गोमूत्रेण च गोमयेन पयसा दध्ना च गव्यघृतैः० । सद्दंभौदक-कार्त्तवीर्य्य-जवजैश्रूर्णै-स्तथा दूर्ब्बया० ॥ १ ॥ कुष्माण्डेन गुडेन विल्वतुलसीपत्रेण वा पारणम्० । द्वाद-श्यां मंदितं क्रमान्मुनिवरै-र्म्मार्गार्गादितस्तत्फलम्० ॥ कार्त्त-वीर्य्यस्तिलः" विल्वतुलस्योर्व्विकल्पः ॥ अथ नवान्नवि० । तत्र शस्तर्क्षादि० । रौहिण्यादिद्वयं पुनर्ब्वस्वादिद्वयं उत्तरा-त्रयं हस्तादिपञ्च श्रवणात्रिकं रेवत्यादिद्वयं एतन्नक्षत्राणि,, शुक्र-शनि-मङ्गलान्यवाराः" नन्दा-रिक्ता-त्रयोदश्यन्यतिथ-यः" तृतीयजन्मभिन्नतारा:" अष्टमान्यचन्द्रः" विशाखाभि-न्ननक्षत्रस्थसूर्य्यः" पौष-चैत्र-कार्त्तिकान्यमासाः" शुक्लपक्षः" हरिशयनभिन्नकालः ॥ निषिद्धोप्यनेनैवोहनीयः ॥ * ॥

इति पञ्चाननाङ्घ्रयब्जषट्पदशब्दकाननपञ्चाननमै-थिलश्रोपनामश्रीसदाशिवशर्म्मसङ्गृहीतसूर्य्य-ब्जाहस्करो ग्रन्थः ॥*॥ शम्भूयात् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection